
Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :9.014(2025); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
( Fulfilled Suggests Parameters of UGC by IJMER)
Volume:14, Issue:10(5), October, 2025
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed : Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available : www.ijmer.in

# अद्वैतवेदान्ताध्ययनं प्रति बौद्धदर्शनाध्ययनापेक्षा

**डा. राघवेन्द्र भट्टः**

**सा. प्रा. शास्त्रविद्यागुरुकुलम्**

**डा.सचिनद्विवेदी**

**सा. प्रा. शास्त्रविद्यागुरुकुलम्**

कविकुलगुरुकालिदाससंस्कृतविश्वविद्यालयःरामटेकम्

## भूमिका

भारतीयसंस्कृतौ या जीवनशक्तिः दृष्टिगोचरतां याति, तस्याः मूलकारणम् अस्माकं भारतीयज्ञानपरम्परायां विद्यमानः ज्ञानभाण्डार एव वर्तते।तस्मिन्नेव ज्ञानरूपे भाण्डारे, वेदाः, दर्शनानि, अनेकानि शास्त्राणि आगमाः च आयान्ति, यानि च प्राणिनां मानसं पवित्रीकुर्वन्तः अज्ञानजन्यतमसः निवारणेन जीवनं शान्तीकुर्वन्तः अद्यापि राराज्यन्ते। तत्र कालदृष्ट्या यदि वयमिमां परम्परामधिगच्छामः, तत्र सर्वप्राचीना वैदिकी परम्परा, यत्र च वेदाः, संहिता, ब्राह्मणमुपनिषदित्यादि, ततः परं सूत्रकालः, ततः परं वार्तिककालः, ततः परं च कारिकादिकालः, ततः परमनेकानि शास्त्राणि ऋषीणां मुखात् समागतानि।

सर्वाण्यपि दर्शनानि यद्यपि एकमेव मनुष्याणाम् आत्यन्तिकदुःखनिवृत्तिरूपं मोक्षाख्यम् अर्थं मानवानां हितं, प्रतिपादयन्ति। तथापि कालिदासोक्त्यनुसारेण 'भिन्नरुचिर्हिलोकः[1]' इति लौकिकानां पुरूषाणां भिन्नरुचित्वात् , तेषां कृते यथायोग्यं, यथेच्छं च जीवनोन्नतये मार्गः प्रदेय इति कृत्वा ऋषिभिरनेकानि दर्शनानि समुपदिष्टानि वर्तन्ते। तेषु अन्यतमं दर्शनं, वेदान्तदर्शनं बौद्धदर्शनं च भवति। यदा वयं वेदान्ताध्ययनं कुर्मः, तदानीं तत्र तथा नैके पक्षाः आयान्ति यत्र बौद्धदर्शने विद्यमानानां प्रमेयाणामवगमः नितरामपेक्षितो भवति। अतः अस्मिन् शोधपत्रे वेदान्तदर्शनाध्ययनं प्रति बौद्धदर्शनस्य अध्ययनस्य का अपेक्षा वर्तते,

---

[1] रघुवंशमहाकाव्यम्

कुत्र वेदान्ताध्ययनावसरे च बौद्धदर्शनस्य प्रमेयाणामागमो वर्तते इति विचारः करिष्यते। अस्मिन् शोधपत्रे कस्यापि दर्शनस्य अथवा दर्शनगतप्रमेयस्य निराकरणादिविषये मतिर्नास्ति अपितु सर्वेषामपि दर्शनानां सर्वदर्शनाध्ययनं प्रति साहाय्यकत्वं वर्तते सर्वमपि दर्शनं सर्वैरपि अध्येयमिति विषयं मनसि निधाय अद्वैतवेदान्तदर्शनस्य अध्ययनार्थं बौद्धदर्शनस्य का अपेक्षा वर्तते इति विचार्यते।

कुञ्चिकाशब्दः- ख्यातिः, अनिर्वचनीयत्वं, अध्यासः, मिथ्यात्वम्, निर्वाणम्, अद्वैतत्वमित्यादि

**मुख्यप्रतिपाद्यविषयः**

अध्यासभाष्ये श्रीशङ्कराचार्येण दर्शनपरम्परायां नूतनं प्रवेशद्वारं निर्मितम्। ब्रह्मसूत्राणां प्रथमं भाष्यमेव "अध्यासभाष्यम्" इति प्रसिद्धम्। अस्य मुख्यम् उद्देशः- जीवस्य स्वस्वरूपे ब्रह्मणि अविद्यासम्प्रसूतः अनात्मनः देहादेः आत्मत्वेन आरोपः इति यः सामान्यलोकप्रसिद्धो भ्रान्त्यनुभवः, तस्य तात्त्विकं विश्लेषणं प्रदर्शयितुं। शङ्करः दर्शयति- यदा आत्मा अनाद्यविद्यया आच्छादितः तदा देहादयः अनात्मभूताः अपि आत्मत्वेन अनुभूयन्ते। एवं विपरीतं च आत्मस्वरूपं देहेन्द्रियादिषु प्रत्यभासते। अयं परस्परविरुद्धयोः सत्यानृतयोः मिथुनीकरणरूपः अनुभवः "अध्यासः" इति परिभाष्यते। एषः अध्यासः सर्वानुभवसिद्धः, यस्य नाशे वेदान्तशास्त्रस्य आवश्यकता न स्यात्। अतः शङ्करः अत्रैव प्रतिपादयति- ब्रह्मसूत्राणां समग्रः उद्देश्यः अस्य अध्यासस्य निवारणमेव।

ब्रह्मसूत्रे "अथातो ब्रह्मजिज्ञासा" इति सूत्रे, शङ्करः स्पष्टं प्रतिपादयति यत् ब्रह्मविद्यायाः फलम् अध्यासविनिवृत्तिः। जीवस्य बन्धनं न किञ्चन वास्तविकम्, केवलं मिथ्याज्ञानजन्याध्यासरूपम्। यदा "शुक्तौ रजतम्" इव भ्रान्त्या अनात्मनि आत्मबुद्धिः जायते, तदा सुखदुःखादिसंसारधर्माः आत्मनि आरोप्यन्ते। तस्मात् मोक्षः अपि न किञ्चन नूतनप्राप्तिः, किन्तु केवलम् अज्ञाननिवृत्त्यात्मना स्वस्वरूपस्य प्रकटिः। एषः अध्यासभाष्यस्य परमः तात्पर्यः– जीवात्मनः स्वाभाविकं

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :9.014(2025); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
( Fulfilled Suggests Parameters of UGC by IJMER)
Volume:14, Issue:10(5), October, 2025
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed : Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available : www.ijmer.in

ब्रह्मैकत्वं प्रकाशयितुं भ्रान्त्याध्यासस्य खण्डनं कर्तव्यमिति। अत्रैव सम्पूर्णवेदान्तशास्त्रस्य आधारभूतः तत्त्वनिश्चयः संस्थाप्यते।

यदा अस्माभिः भगवता बादरायणप्रणीतब्रह्मसूत्राणामुपरि भगवत्पादश्रीशङ्कराचार्याणां करकमलाभ्यां विलिखितभाष्यस्य अध्ययनं क्रियते, तदानीमध्यासभाष्ये एव आचार्यैः अध्यासस्य अनेकानि लक्षणानि प्रणीतानि वर्तन्ते। तत्र 'कोऽयमध्यासो नाम...' इत्युक्त्वा 'स्मृतिरूपः परत्र पूर्वदृष्टावभासः'[2] इति एकं सर्वसामान्यम् अध्यासलक्षणं प्रस्तुत्य ततः परं सर्वेषामपि दार्शनिकानामनुसारेण अध्यासस्य लक्षणं तैः प्रस्तूयते।

१. स्मृतिरूपः परत्र पूर्वदृष्टावभासः[3]

२. अन्यत्र अन्यधर्माध्यासः[4]

३. यत्र यदध्यासः तद्विवेकाग्रहनिबन्धनो भ्रमः[5]

४. यत्र यदध्यासः तस्यैव विपरीतधर्मत्वकल्पनामाचक्षते[6]

इत्येव चत्वारि लक्षणानि प्रणीय अन्ते च निर्णयः अकारि यत् सर्वथा त्वन्यस्य अन्यधर्मावभासतां न व्यभिचरति[7] इति।तत्र अध्यासो नाम 'अतस्मिन्स्तदबुद्धिः भ्रमज्ञानमित्यर्थः। भ्रमज्ञाननिरूपणाय एव दार्शनिकैः ख्यातयः व्याख्याताः सन्ति। तत्र भ्रमस्थले अधिष्ठानारोप्ययोः कीदृशं स्वरूपं वर्तते इत्यत्र सर्वेषामपि वादिनामस्ति मतभेदः। अतः तस्यैव 'तं केचित्...' इत्यादिपङ्क्त्या मतभेदान् प्रस्तुवन्ति। तत्र बौद्धानामपि यः आत्मख्यातिः, असत्ख्यातिः इत्यादिवादाः सन्ति, तेषां वादानां निरूपणं क्रियते। सामान्यतः -

'आत्मख्यातिरसत्ख्यातिरख्यातिः ख्यातिरन्यथा।

---

[2] ब्रह्मसूत्रशाङ्करभाष्ये अध्याससामान्यलक्षणम्

[3] आत्मख्यातिः योगाचारः

[4] न्यायवैषेशिकयोः अन्यथाख्यातिः

[5] अख्यातिः,

[6] असत्ख्यातिः, माध्यमिकाः

[7] ब्रह्मसूत्रशाङ्करभाष्ये अध्याससामान्यलक्षणम्

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :9.014(2025); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
( Fulfilled Suggests Parameters of UGC by IJMER)
Volume:14, Issue:10(5), October, 2025
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed : Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available : www.ijmer.in

तथाऽनिर्वचनीयख्यातिः एतत्तु ख्यातिपञ्चकम्॥'

'विज्ञानशून्यमीमांसातर्काद्वैतविदां मतम्।'

| क्रम | ख्यातयः | दर्शनम् |
|---|---|---|
| १ | आत्मख्यातिः | योगाचाराः बौद्धाः |
| २ | असत्ख्यातिः | माध्यमिकाः बौद्धाः |
| ३ | अख्यातिः | मीमांसकाः, सांख्याः |
| ४ | अन्यथाख्यातिः | नैय्यायिकाः |
| ५ | अनिर्वचनीयख्यातिः | अद्वैतवेदान्तः |

तत्र आत्मख्यातिः इति यत् वर्तते, तत् विज्ञानवादिनां बौद्धानां वर्तते, असत्ख्यातिः माध्यमिकानां शून्यवादिनां वर्तते, अख्यातिः मीमांसकानां साङ्ख्यानां च वर्तते, अनिर्वचनीयख्यातिः वेदान्तिनां वर्तते, अन्यथाख्यातिः नैयायिकानां वर्तते इत्येवं रूपेण पञ्च ख्यातयः सन्ति।

सामान्यतया बौद्धानां चत्वारः सम्प्रदायाः लोके प्रसिद्धाः - माध्यमिकाः, यौगाचाराः, सौत्रान्तिकाः, वैभाषिकाः इति। तत्र माध्यमिकानां मते बाह्यमाभ्यन्तरं सर्वं शून्यं वर्तते इति कृत्वा ते सर्वशून्यवादिनः इत्यनेन ख्यातिना अलङ्कृताः। योगाचाराणां मते बाह्यार्थं सर्वं शून्यमस्ति किन्तु आभ्यन्तरं विज्ञानात्मकत्वेन तेषां पदार्थानां तेषां सत्यत्वं वर्तते, अतस्ते योगाचाराः क्षणिकं विज्ञानमेव आत्मानं मन्वते। प्रतिक्षणं यत् नश्यति तदेव विज्ञानं बाह्याकारेण प्रतीयते इति क्षणिकविज्ञानविज्ञानवादिनां मतम्, एते एव बाह्यार्थशून्यवादिनः इति कथ्यन्ते।

सौत्रान्तिकास्तु बाह्यार्थवादिनः वर्तन्ते, किन्तु तेषामपि मते सर्वस्यापि पदार्थस्य क्षणिकत्वात् कस्यापि वस्तुनः प्रत्यक्षता न भवतीति कृत्वा सर्वोऽपि पदार्थः तैरनुमीयते। अन्ते च वैभाषिकः, सोऽपि बाह्यार्थवादी वर्तते, प्रत्यक्षोऽपि भवति। तत्र सौत्रान्तिकवैभाषिकयोर्मध्ये बाह्याभ्यन्तरभेदेन पदार्थस्य सत्यत्वं तु अवगम्यते किन्तु क्षणिकत्वं तैरभ्युपेयते इति कृत्वा उभयोः सर्वास्तित्ववादित्वकोटौ अन्तर्भावो

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :9.014(2025); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
( Fulfilled Suggests Parameters of UGC by IJMER)
Volume:14, Issue:10(5), October, 2025
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed : Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available : www.ijmer.in

भवति। प्रकृतमनुसरामश्चेत् अत्रापि असत्ख्यातिवादः अनन्तरम् आत्मख्यातिवादः इति यत् ख्यातिवादद्वयमस्ति तत् द्वयमत्र भगवत्पादैः उपवर्णितं वर्तते। तत्र 'यत्र यदध्यासः तस्यैव विपरीतधर्मत्वकल्पनामाचक्षते।' इति भाष्यकाराणां पङ्क्तिरस्ति। यत्र यदध्यासः, यत्र शुक्तिकायां यस्य रजतस्य अध्यासः तस्यैव रजतस्य शुक्तिकायां विपरीतधर्मत्वकल्पनमर्थात् अत्यन्तासत्त्वरजतस्य कल्पनमाचक्षते के? इति चेत् असत्ख्यातिवादिनः, शून्यवादिनः माध्यमिकाः। तेषामनुसारेण सकलस्यापि जगतः असत्त्वात् रजतादीनामपि प्रतीतिः या तत्र जायते शुक्त्यादिषु साऽपि असत्ख्यातिद्वारा एव, साऽपि असद्भूता एव वर्तते इति कृत्वा तैः असत्ख्यातिरिति अङ्गीक्रियते।

बौद्धदर्शने असत्ख्यातिः इति विपर्ययस्य (भ्रमस्य) विशेषसिद्धान्तः अस्ति, यस्मिन् असत् वस्तु एव सत् इति अनुभूयते। असत्ख्यातिवादे तु यत् वस्तुनः वास्तविकं स्वरूपं नास्ति, तत् अपि ज्ञाने सत् इव प्रतीतिं जनयति। असत् वस्तुनः ख्यातिः (प्रकाशनम्) तत्र स्यात् यत्र ज्ञेयस्य स्वरूपं मिथ्या प्रतीतेः कारणं भवति। असत्ख्यातिः विशेषतया मध्यमिकदर्शनस्य सिद्धान्ते प्रमुखतया विवेच्यते, यत्र सर्वेषु वस्तुषु स्वभावतः शून्यता इति कथ्यते। वस्तूनां स्वभावे नास्तित्वं चेत् अपि तानि लोकबुद्धौ सत् इव प्रतीतिं जनयन्ति। असत्ख्यातिवादेऽत्र तात्पर्यम् अस्ति यत् वस्तूनां यथार्थस्वरूपं तु शून्यम् अस्ति, किन्तु तस्य मिथ्याज्ञानात् तानि सत् इव ज्ञायन्ते। असत्ख्यातिवादः अन्यदर्शनानां सत्ख्यातिवादाद् भिन्नः अस्ति, यत्र वास्तविकं सत् वस्तु एव ज्ञाने भ्रान्त्या अन्यथा अनुभूयते। बौद्धदर्शने तु असत्ख्यातिः स्वस्वरूपतः तत्त्वज्ञानस्य भ्रान्तिरूपेण विशदीकृत्यते।

बौद्धदर्शने **आत्मख्यातिः** इति विपर्ययस्य (भ्रमस्य) कारणं चित्तमेव अस्ति इति मतं प्रकाश्यते। आत्मख्यातिवादे तु यदा कश्चित् विपर्ययं (भ्रमं) पश्यति, तदा स विपर्ययः बाह्यवस्तुनः कारणेन न भवति, अपितु आत्मनः वा चित्तस्य अन्तर्गतकार्येणैव भवति। बौद्धदर्शनस्य विज्ञानवादे प्रमुखतया कथ्यते यत् सर्वे अनुभवाः केवलं चित्तेनैव निर्मिताः भवन्ति, न तु बाह्यवस्तुभिः। अतः आत्मख्यातिवादे सिद्दान्तः अस्ति यः पश्यति यत् विपर्ययस्य उत्पत्तिः आत्मनः

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :9.014(2025); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
( Fulfilled Suggests Parameters of UGC by IJMER)
Volume:14, Issue:10(5), October, 2025
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed : Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available : www.ijmer.in

स्वभावतः एव जायते, न बाह्यवस्तूनाम् अज्ञानतया। अन्ये दर्शनेषु, यथा न्यायवैशेषिके अख्यातिवादः, अन्यख्यातिवादः च इति मताः सन्ति यत्र विपर्ययस्य कारणं बाह्यवस्तूनि वा अन्यकारणानि कथ्यन्ते। किन्तु बौद्धदर्शने आत्मख्यातिवादः तु आत्मनः वा चित्तस्य दोषेण एव भ्रमस्य कारणं दृश्यते।

योगाचाराणां या आत्मख्यातिः वर्तते तद्विषयेऽपि भाष्यकाराः तत्र लक्षणं लिखन्ति - 'अन्यत्र अन्यधर्मावभास'[8] इति। अर्थात् योगाचाराणामन्यथाख्यातिरिति प्रसिद्धा वर्तते। योगाचाराणां मते सर्वं बाह्यं शून्यं वर्तते, किन्तु यदाभ्यन्तरं विज्ञानमस्ति तस्यैव सत्यत्वमङ्गीक्रियते। अतः सर्वस्यापि क्षणिकत्वात् प्रतिक्षणं सर्वस्यापि पदार्थस्य नष्टस्वभावत्वात् यद्यत् प्रतीयते तत्सर्वं विज्ञानात्मकत्वेन प्रतीयते इति तेषां मतम्। अतः, असत्पदार्थानाम् अर्थात् मिथ्याभूतानां पदार्थानां तत्र कथं ग्रहणं भवतीति चेत् तत्र अनादिभूता या अविद्या वर्तते तद्वशे एव विज्ञानस्वरूप एव ज्ञाता, ज्ञेयं, ज्ञानं सर्वं वर्तते, इति कृत्वा तत्सर्वं पृथक् पृथक् अवभास्यते। यदा ज्ञातृज्ञानज्ञेयानां पृथक् पृथक् अवभासो भवति तदानीमेव तत्र भ्रमो जायते अतः अन्यत्र अन्यधर्मावभासः विज्ञानरूपस्य धर्मस्य रजतादिरूपेण तत्र असद्भूतरजतस्य शुक्तिकायां यः अवभासः सैव अन्यत्र अन्यधर्माध्यास इति उच्यते।

**उसंहारः**

एवमेव ब्रह्मसूत्रस्य द्वितीयाध्याये द्वितीयः पादः अवलोक्यते चेत् तत्रापि तथैव अनेके विचाराः वर्णिताः सन्ति। तत्रापि विशेषेण समुदयाधिकरणे

- **उत्तरोत्पादे च पूर्वनिरोधात्**[9]
- असतिप्रतिज्ञोपरोधो यौगपद्यमन्यथा[10]
- प्रतिसंख्या$प्रतिसंख्यानिरोधाप्राप्तिरविच्छेदात्[11]

---

[8] ब्रह्मसूत्रशाङ्करभाष्ये

[9] ब्रह्मसूत्र, २.२.४

[10] ब्रह्मसूत्र, २.२.५

[11] ब्रह्मसूत्र, २.२.६

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :9.014(2025); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
( Fulfilled Suggests Parameters of UGC by IJMER)
Volume:14, Issue:10(5), October, 2025
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed : Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available : www.ijmer.in

- उभयथा च दोषात्[12]

अत्र चतुर्षु अपि सूत्रेषु बौद्धदार्शनिकाः सिद्धान्ताः वर्णिताः सन्ति। यथा वेदान्तेषु कार्यकारणवादह् चर्च्यते, ख्यातिवादः च विचार्यते तदा निश्चयेन बौद्धदर्शनस्य विचाराः अवश्यं विचारणीयाः एव भवन्ति। तथा च कथं असतः सज्जायते, असद्वा इदमग्र आसीत् इत्याद्याः श्रुतयः भाष्येषु विचार्यन्ते तदापि बौद्धदर्शनस्य प्रमुखाणां प्रमेयाणाम् अनुशीलनं क्रियते।

भारतीयदर्शनपरम्परायां बौद्धमतं वेदान्तस्य समीपे महन्तं प्रभावं जनयति। बौद्धाः आत्मतत्त्वं नाङ्गीकुर्वन्ति, केवलं विज्ञानमात्रं क्षणिकं सत्यं वदन्ति। अद्वैतवेदान्तः अपि देह-मनः-इन्द्रियादीनां मिथ्यात्वं प्रतिपादयति, जगच्च मायामयं मन्यते। अतः उभयोः पक्षयोः एकं साम्यं दृश्यते—जगतः स्थायित्वाभावः, व्यावहारिकसत्यस्य मिथ्यात्वबुद्धिः च। तथापि वेदान्तः आत्मैक्यं ब्रह्मणः नित्यं सत्यं च प्रतिपादयति, यद्बौद्धाः न स्वीकरोति। बौद्धाः शून्यतामेव परमार्थं वदन्ति, वेदान्तः तु ब्रह्मणः सच्चिदानन्दस्वरूपं नित्यं सत्यमिति प्रतिपादयति। शंकराचार्यः अद्वैतसिद्ध्यर्थं बौद्धदर्शनं प्रतिपक्षतया विवेच्य तद्वादान् निरस्तवान्। शून्यवादे प्रमेयप्रमाणाभावः, विज्ञानवादे प्रत्यभिज्ञानासम्भवः, क्षणिकवादे स्मृतिसम्बन्धविच्छेदः इत्यादिदोषान् प्रदर्श्य खण्डनं कृतवान्। एवम्, वेदान्तः बौद्धदर्शनात् किंचित् साम्यं स्वीकरोति—जगन्मिथ्यात्वे, विज्ञानप्रधानतायां च—किन्तु तस्य नास्तित्ववादं परित्यज्य ब्रह्मैकसत्यं प्रतिपादयति। अतः बौद्धदर्शनं वेदान्तस्य अपेक्षया एकं पूर्वपीठिकासदृशं, प्रतिपक्षरूपं च व्यवह्रियते, येन अद्वैतवेदान्तस्य अद्वितीयब्रह्मवादः अधिकं दृढतया प्रतिष्ठापितः। यदि अद्वैतवेदान्ताध्ययनं सूक्ष्मतः करणीयं तर्हि निश्चयेन बौद्धदर्शनस्य अध्ययनं करणीयमेव इति शम्।

## सन्दर्भग्रन्थसूची

१. ब्रह्मसूत्रशांकरभाष्यम्,स्वामीसत्यानन्दसरस्वती,चौखम्बासंस्कृतप्रतिष्ठान दिल्ली

---

[12] ब्रह्मसूत्र, २.२.७

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :9.014(2025); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
( Fulfilled Suggests Parameters of UGC by IJMER)
Volume:14, Issue:10(5), October, 2025
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed : Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available : www.ijmer.in

२. ब्रह्मसूत्रशांकरभाष्यम् भामती, चौखम्बा संस्कृत प्रतिष्ठान दिल्ली

३. ईशादि नव उपनिषद्, सभाष्य, गीताप्रेस गोरखपुर

४. उपनिषद्भाष्यम्, दक्षिणामूर्तिमठ प्रकाशन, वाराणसी

५. जैमिनीयसूत्रम्, मुरलीधरशर्मा, प्राभाकरीययन्त्रालयम्, काशी

६. सर्वदर्शनसंग्रहः, चौखम्बा संस्कृत प्रतिष्ठान दिल्ली

७. भारतीयदर्शन, चौखम्बा संस्कृत प्रतिष्ठान दिल्ली